॥ वाल्मीकि रामायण॥

७ उत्तरकाण्ड

अध्याय ६८

पुरा त्रेतायुगे ह्यासीदरण्यं बहुविस्तरम् ।
समन्ताद्योजनशतं निर्मृगं पक्षिवर्जितम् ॥ १॥

तस्मिन्निर्मानुषेऽरण्ये कुर्वाणस्तप उत्तमम् ।
अहमाक्रमितुं शौम्य तदरण्यमुपागमम् ॥ २॥

तस्य रूपमरण्यस्य निर्देष्टुं न शशाक ह ।
फलमूलैः सुखास्वादैर्बहुरूपैश्च पादपैः ॥ ३॥

तस्यारण्यस्य मध्ये तु सरो योजनमायतम् ।
पद्मोत्पलसमाकीर्णं समतिक्रान्तशैवलम् ॥ ४॥

तदाश्चर्यमिवात्यर्थं सुखास्वादमनुत्तमम् ।
अरजस्कं तथाक्षोभ्यं श्रीमत्पक्षिगणायुतम् ॥ ५॥

तस्मिन्सरःसमीपे तु महदद्भुतमाश्रमम् ।
पुराणं पुण्यमत्यर्थं तपस्विजनवर्जितम् ॥ ६॥

तत्राहमवसं रात्रिं नैदाघीं पुरुषर्षभ ।
प्रभाते काल्यमुत्थाय सरस्तदुपचक्रमे ॥ ७॥

अथापश्यंः शवं तत्र सुपुष्टमजरं क्व चित् ।
तिष्ठन्तं परया लक्ष्म्या तस्मिंस्तोयाशये नृप ॥ ८॥

तमर्थं चिन्तयानोऽहं मुहूर्तं तत्र राघव ।
विष्ठितोऽस्मि सरस्तीरे किं न्विदं स्यादिति प्रभो ॥ ९॥

अथापश्यं मुहूर्तात्तु दिव्यमद्भुतदर्शनम् ।
विमानं परमोदारं हंसयुक्तं मनोजवम् ॥ १०॥

अत्यर्थं स्वर्गिणं तत्र विमाने रघुनन्दन ।
उपास्तेऽप्सरसां वीर सहस्रं दिव्यभूषणम् ।
गान्ति गेयानि रम्याणि वादयन्ति तथापराः ॥ ११॥

पश्यतो मे तदा राम विमानादवरुह्य च ।
तं शवं भक्षयामास स स्वर्गी रघुनन्दन ॥ १२॥

ततो भुक्त्वा यथाकामं मांसं बहु च सुष्ठु च ।
अवतीर्य सरः स्वर्गी संस्प्रष्टुमुपचक्रमे ॥ १३॥

उपस्पृश्य यथान्यायं स स्वर्गी पुरुषर्षभ ।
आरोढुमुपचक्राम विमानवरमुत्तमम् ॥ १४॥

तमहं देवसङ्काशमारोहन्तमुदीक्ष्य वै ।
अथाहमब्रुवं वाक्यं तमेव पुरुषर्षभ ॥ १५॥

को भवान्देवसङ्काश आहारश्च विगर्हितः ।
त्वयायं भुज्यते सौम्य किं कर्थं वक्तुमर्हसि ॥ १६॥

आश्चर्यमीदृशो भावो भास्वरो देवसंमतः ।
आहारो गर्हितः सौम्य श्रोतुमिच्छामि तत्त्वतः ॥ १७॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 26, 1998; Send corrections to sanskrit@cheerful.com